National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 182-185
© 2023 NJHSR
www.sanskritarticle.com

**पाढी प्रभाकरः**
शोधच्छात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**पाढी प्रभाकरः**
शोधच्छात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# जगद्गुरुरामभद्राचार्यप्रणीतेषु रामभक्त्याधारितखण्डकाव्येषु छन्दसां विचारः

**पाढी प्रभाकरः**

**कविपरिचयः-**

संस्कृतसाहित्यजगति प्रथितकीर्तयो विलक्षणप्रतिभावन्तः पदवाक्यप्रमाणपारावारीणाः पद्मविभूषण-साहित्याकादमीराष्ट्रियपुरस्कारादिभिः सभाजिताः प्रस्थानत्रयीभाष्यकाराः महामहोपाध्यायाः जगद्गुरुरामभद्राचार्य-दिव्याङ्गविश्वविद्यालयस्य आजीवनकुलाधिपतयः श्रीचित्रकूटस्थमन्दाकिनी-विमलपुलिननिवासिनः श्रीतुलसीपीठाधीश्वराः धर्मचक्रवर्तिनश्च भवन्ति श्रीमज्जगद्गुरुरामानन्दाचार्याः स्वामिरामभद्राचार्याः।

श्रीस्वामिरामभद्राचार्याणां जन्म उतरप्रदेशस्य जौनपुरजनपदान्तर्गते शाण्डिखुर्दनामकग्रामे १४ जनवरी १९५० तमे दिनाङ्के माघकृष्णैकादश्यां (मकरसङ्क्रान्तौ) वसिष्ठगोत्रीये सरयूपारीणविप्रामले कुले श्रीराजदेवमिश्रस्य चतुर्थापत्यरूपेण श्रीमत्याः शचीदेव्याः दक्षिणकुक्षितः समभवत्। अस्य महानुभावस्य पितामहस्य पितृव्यात्मजा काचित् मीराबाय्याः भक्तासीत्। तस्मात् सा नवजातस्य बालकस्य **गिरिधरः** इति नामकरणं कृतवती। दैवदुर्विपाकात् गिरिधरस्य नेत्रदृष्टिः मासद्वयावधौ गता। ततः प्रभृति प्रज्ञाचक्षुरेषः। अध्ययनाय रचनायै वा तेन ब्रेइलीलिपिः (अन्धैः उपयुज्यमाना) कदापि न प्रयुक्ता। तस्य बाल्ये माध्यमिकशिक्षानन्तरम् १९७१ ईशवीयाब्दे गिरिधरमिश्रः वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालये संस्कृतव्याकरणे स्नातकोत्तरोपाधेः अध्ययनाय प्रविष्टवान्। आचार्योपाधिं लब्ध्वा गिरिधरमिश्रः विद्यावारिध्युपाधेः शोधकार्याय विश्वविद्यालये पण्डितरामप्रसादत्रिपाठीनिर्देशकत्वे पञ्जीकृतवान्। १९८१ ईशवीयाब्दे गिरिधरमिश्रेण संस्कृतव्याकरणे संपूर्णानन्दसंस्कृतविश्वविद्यालयतः विद्यावारिध्युपाधिरार्जिता। १९९७ तमे संवत्सरे एते संपूर्णानन्दसंस्कृतविश्वविद्यालयेन डि.लिट्. (विद्यावाचस्पतिः) इति उपाधिना समलङ्कृताः। १९८३ तमे संवत्सरे गिरिधरमिश्रः कार्त्तिकशुक्लपौर्णमास्यां श्रीरामानन्दसम्प्रदाये श्री श्री १०८ श्रीरामचरणदासमहाराज-फलाहारीतः विरक्तदीक्षामलभत्। एतदनन्तरं गिरिधरमिश्रः रामभद्रदासः इति नाम्ना ख्यातः। १९८७ तमे संवत्सरे रामभद्रदासः चित्रकूटे श्रीतुलसीपीठाभिधानमेकं धार्मिकसामाजिकसेवासंस्थानं स्थापितवान्। पीठस्थापनानन्तरं साधुविद्वज्जनैः रामभद्रदासः श्रीचित्रकूटतुलसीपीठाधीश्वरः इत्युपाधिनालङ्कृतः। १९९६ तमे संवत्सरे स्वामिरामभद्राचार्याः चित्रकूटे दृष्टिहीनविद्यार्थिभ्यः तुलसीप्रज्ञाचक्षुर्विद्यालयनाम्ना एकं विद्यालयं स्थापितवन्तः। ततः पश्चात्सः केवलदिव्याङ्गविद्यार्थिभ्यः उच्चशिक्षाप्राप्तये एकं संस्थानं स्थापयितुम् उपाक्रमत। अनेनोद्देश्येन सः २००१ तमे संवत्सरे उत्तरप्रदेशराज्ये चित्रकूटे जगद्गुरुरामभद्राचार्यदिव्याङ्गविश्वविद्यालयं स्थापितवन्तः। अयं विश्वविद्यालयः भारतस्य विश्वस्य च प्रथमो दिव्याङ्गविश्वविद्यालयोऽस्ति। एते २००२ तमे संवत्सरे षाण्मासिकपयोव्रत्तानुष्ठानपराः सन्तः श्रीभार्गवराघवीयनामकं संस्कृतमहाकाव्यं रचितवन्तः। अस्य महाकाव्यस्य कृते २००५ तमे वर्षे संस्कृतसाहित्य-अकादमीपुरस्कारः सम्प्राप्तः। एतदतिरिच्य एते महाभागाः महाकाव्यं, खण्डकाव्यं, गीतिकाव्यं, पत्रकाव्यं, स्तोत्रकाव्यं, शतककाव्यम् इत्यादीनि विविधभाषासु **रचितवन्तः**।

जगद्गुरुरामानन्दाचार्यो महाकवीन्द्रः स्वामिश्रीरामभद्राचार्यः लोकोत्तरगुणगणैः समलङ्कृतः आप्तपुरुषो **वर्तते**। विद्वज्जगति स्वामिश्रीरामभद्राचार्याणां व्यक्तित्वं, कृतित्वञ्च विलक्षणं वर्तते ।

**छन्दसां परिचयः-**

**क) छन्दश्शब्दस्य व्युत्पत्तिः-**

"छदिँ संवरणे" इत्यस्माद्धातोः चुरादिगणे "घञ्" प्रत्यये आह्लादनार्थे, छादनार्थे च छन्दः इति शब्दो निष्पद्यते। "छन्दांसि छादनात्" इति निरुक्तवचनानुसारं येन भावरसादयः आच्छादिताः भवन्ति तच्छन्दः। अतः छादकत्वं सीमाबन्धनञ्च छन्दसः सामान्यलक्षणम्। चदि -आह्लादने दीप्तौ च इति धातोश्चन्दयति आह्लादयतीति व्युत्पत्त्या "चदेरादेश्च छः" इति सूत्रेण छकारादेशे असुन् प्रत्यये कृते छन्दस् शब्द : निष्पद्यते। अतो येन सहृदयपाठकानामाह्लादानन्दो वा जायते तच्छन्दः। छन्दः सर्वभयविनाशकारिसाधनं भवति। मृत्युं दूरीकृत्य एतदमरत्वं ददाति। पाणिनीयशिक्षायां छन्दः पादौ तु वेदस्य इति वचनानुसारं छन्दः वेदपुरुषस्य पादत्वेन स्वीक्रियते। तदित्थम्-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरूक्तं श्रोत्रमुच्यते।।**[1]
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[2]

पादाभ्यां यथा प्राणीनां गतिर्भवति तथा छन्दोभिः मन्त्रात्मकवेदस्वरूपस्य निर्मितिः प्रगतिश्च भवति। वैदिकच्छन्दसां ज्ञानं विना वेदमन्त्राणाम् अध्ययनम् नैव कर्त्तव्यम्। अमरकोषानुसारं छन्दः पद्येऽभिलाषे च इति ज्ञायते। छन्दश्शास्त्रस्य आदिमप्रवर्तकः भगवान् शङ्करः। ततः देवेन्द्रप्रभृतयः शास्त्रमिदं ज्ञातवन्तः। छन्दः भगवतो वेदस्य पादरूपमपि भगवतः विष्णोः शिरोभूतमिति श्रीमद्भागवतमहापुराणे वर्णितम्।

वैदिककालादेवच्छन्दसां प्रयोगपरम्परा दरीदृश्यते। वैदिक-लौकिकशास्त्राणां सम्यक् उच्चारणार्थं तेषामर्थज्ञानाय च छन्दश्शास्त्रस्य ज्ञानमनिवार्यमेव। छन्दश्शास्त्रं काव्यवाङ्मयस्य प्राणसदृशं भवति। वेदे ऋचः सर्वेऽपि छन्दोबद्धाः एव। यो जनः छन्द-ऋषि-देवता-ब्राह्मणज्ञानं विना वैदिकमन्त्रैः यज्ञं सम्पादयति, अध्यापयति वा स पापी भवति। अतः एवोक्तम्-

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**[3]

वेदोच्चारणसमये एकस्य पदस्य, अक्षरस्य, मात्रायाः वा लोपेन पापहेतुः भवति। छन्दोबद्धरचनासु अक्षरस्य अथवा मात्रायाः लोपं ज्ञातुम् अधिकः अवकाशः वर्त्तते। छन्दोज्ञानं विना वेदस्य अध्ययनम्, अध्यापनम्, यजनं, याजनं वा निषिद्धम् इति श्रुतिप्रसिद्धम्। वेदस्य विशुद्धं लययुक्तञ्च उच्चारणार्थं छन्दश्शास्त्रस्य अध्ययनमनिवार्यं वर्तते। अनेन शास्त्रेण विना कस्यापि वैदिकमन्त्रस्य फलं नैवोपलभ्यते इति भारतीयप्राचीनार्याणां विश्वासः।

वेदेषु गायत्री, त्रिष्टुप्, बृहती, उष्णिक्, जगती इत्यादीनी छन्दांसि मुख्यतया प्रयुक्तानि वर्तन्ते। उक्तं च यजुर्वेदे-

**बृहत्युष्णिहा ककुप्सूचीभिः शम्यत्तु वा ।।**[4]

एवमेव ब्राह्मणग्रन्थेष्वपि छन्दसां विषये सूचितमस्ति। लौकिककाव्येषु अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, वंशस्थं, मालिनी, शिखरिणी, मन्दाक्रान्ता इत्यादीनी व्यवहृतानि भवन्ति। लौकिक-संस्कृते आदिकविवाल्मीकिः एव सर्वादौ अनुष्टुप्छन्दसः प्रयोगं कृतवान्। आदिकवेः क्रौञ्चद्वन्द्ववियोगजनितः शोकः एव श्लोकत्वेन परिणतः। तद्यथा-

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**[5]

**ख) छन्दोलक्षणम्-**

आह्लादकरं पद्ये यत्र अक्षराणां मात्राणां वा प्रतिपादं गणना भवति तत्र छन्दः इति कथ्यते।

**ग) छन्दोभेदाः-**

पद्यं चतुष्पदी भवति। अर्थात् एकस्मिन् पद्ये चत्वारि पादानि भवन्ति। तत् वृत्तं तथा जातिरिति द्विधा विभज्यते। वृत्तम् इत्यपि छन्दसः नामान्तरं भवति। केचित् जातिरिति अपि कथयन्ति। यत्र अक्षरगणना क्रियते तत् छन्दः वृत्तं भवति एवं च यत्र मात्रागणना क्रियते सा जातिरिति कथ्यते। तद्यथा-

**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।**
**वृत्तमक्षरसङ्ख्यातं जातिमात्रा कृता भवेत्।।**[6]

तत्र समम्,अर्धसमम्,विषमञ्चेति वृत्तं त्रिधा भवन्ति। यदि चतुर्षु पादेषु अक्षरसंख्या तथा गणविचारश्च समानः भवति तर्हि तत् समंवृत्तमिति कथ्यते। यत्र चतुर्षु पादेषु केऽपि द्वे द्वे पादे समाने भवतः तर्हि तत् वृत्तम् अर्धसमवृत्तमित्युच्यते। एवं च यत्र चतुर्षु पादेषु प्रत्येकं पादस्य गणविचारे भग्नता परिदृश्यते तर्हि तत् वृत्तम् विषमवृत्तमित्युच्यते। तद्यथोच्यते-

**सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा।**
**समं समचतुष्पादं भवत्यर्धसमं पुनः।।**
**आदिस्तृतीयवत् यस्य पादस्तुर्यो द्वितीयवत्।**
**भिन्नचिह्न चतुष्पादं विषमं परिकीर्त्तितम्।।**[7]

छन्दश्शास्त्रे अष्टौ गणाः भवन्ति। तद्यथा मगणः, नगणः, भगणः, यगणः, जगणः, रगणः, सगणः, तगणः इति। तद्यथा-

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।**
**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः।।**[8]

अन्यत्रापि गणसंङ्केतस्य विवरणमुपलभ्यते। तद्यथा-

**आदिमध्यावसानेषु भजसा यान्ति गौरवम्।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम्।।**[9]

छन्दश्शास्त्रे "S" इति चिह्नस्य गुरुत्वेन व्यवहारः क्रियते तथा "I" इति चिह्नस्य लघुत्वेन व्यवहारः सर्वजनविदितोऽस्ति। अधोविरच्यमाने कोष्ठकेऽस्मिन् गणसंङ्केतः प्रदर्श्यते।

| मगणः | यगणः | रगणः | सगणः | तगणः | जगणः | भगणः | नगणः |
|---|---|---|---|---|---|---|---|
| SSS | ISS | SIS | IIS | SSI | ISI | SII | III |
| सर्वगुरुः | आदिलघुः | मध्यलघुः | अन्त्यगुरुः | अन्त्यलघुः | मध्यगुरुः | आदिगुरुः | सर्वलघुः |

एवं रूपेण छन्दश्शास्त्रे गणानां संङ्केतः निरूपितः। पुनः ह्रस्वस्य दीर्घस्य च निरूपणं कर्तुमाह-

**एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतज्ञेयो व्यञ्जनञ्चार्धमात्रकम्।।**
**सानुस्वारश्च दीर्धश्च विषर्गो च गुरूर्भवेत्।**
**वर्णः संयोग पूर्वश्च तथापादान्तगोऽपि वा।।**[10]

अर्थात् एकमात्राविशिष्टवर्णः भवति ह्रस्वः अर्थात् लघुः, द्विमात्राविशिष्टवर्णः भवति दीर्घः अर्थात् गुरुः। पुनः त्रिमात्राविशिष्टवर्णः भवति प्लुतः तथा अर्धमात्रायुक्त वर्णः भवति व्यञ्जनवर्णः । पुनः कथितम् –

**संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम्।**
**विज्ञेयमक्षरं गुरूं पादान्तस्थं विकल्पेन।।**[11]

अर्थात् संयुक्तवर्णस्य पूर्ववर्णः, दीर्घस्वरः, अनुस्वारः, तथा विसर्गान्तिवर्णाः च गुरूसञ्ज्ञकाः भवन्ति। पादस्यान्तिमवर्णः विकल्पेन गुरूसञ्ज्ञकः भवति अर्थात् आवश्यकतानुसारं पादस्यान्तिमवर्णं गुरूं-लघुं कर्तुं शक्यते। पुनः गुरू-लघु इत्यनयोः सङ्केतस्य प्रदर्शनं कर्तुम् कथ्यते-

**गुरूरेको गकारस्तु लकारो लघुरेककः।**
**क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा।।**[12]

अर्थात् ग कारः भवति गुरु इत्यस्य प्रतीकः "S", एवञ्च लकारः भवति लघुः इत्यस्य प्रतीकः "I" इति।

काव्यपाठसमये आवश्यकतानुसारं विश्रामः स्वीक्रियते। विश्रामस्थलमेव यतिः इति कथ्यते। छन्दशास्त्रं ज्ञात्वा कवयः काव्यानि रचयन्ति। पाठकाः अपि छन्दश्शास्त्रस्य ज्ञानेन काव्यानां सहजतया अध्ययनं कृत्वा रसास्वादनं कुर्वन्ति।

**विषयस्य परिमितिः -**भृङ्गदूतम्,लघुरघुवरम्,सरयुलहरी इति एतानि त्रीणि खण्डकाव्यानि शोधपत्रस्यास्य परिमितिरूपेण परिकल्पितानि।

**क) भृङ्गदूतखण्डकाव्यस्य सामान्यपरिचयः-**

भृङ्गदूतमेकं खण्डकाव्यमस्ति। अत्र प्रभु श्रीरामः स्वमनोरूपिणं भृङ्गमेव दूतरूपेण परिकल्प्य सीतायाः समीपं प्रेषयामास। अस्मिन् खण्डकाव्ये 501 सङ्ख्याकाः श्लोकाः विद्यन्ते। अस्य खण्डकाव्यस्य शैली तथा भाषा अतीव रमणीया अस्ति। महाकविः कालिदासः यथा मेघदूतस्य विभाजनं पूर्वमेघः, उत्तरमेघः इति रूपेण द्विधा विभाजनं कृतवान् तथैव अयमपि कविः अस्य खण्डकाव्यस्य पूर्वभृङ्ग-उत्तरभृङ्गत्वेन द्विधा विभाजनं कृतवानस्ति। मेघदूतमिव अत्रापि रामेण भृङ्गस्य कृते स्वलक्ष्यस्थलप्राप्तिनिमित्तं मार्गे आगतानां विविध तीर्थस्थानानां यथाविधि वर्णनं कृतमस्ति। उत्तरभृङ्गस्यान्तिमभागे भृङ्गः सीतायाः कृते रामेण प्रेषितं सन्देशं श्रावयामास। विशुद्धभगवद्भक्तिपरकवर्णनत्वादत्र विप्रलम्भशृङ्गारस्य प्राधान्त्वेऽपि श्रीरामं प्रति कवेः विशुद्धभक्तिः प्रधानतया व्यज्यते।

**प्रकृतकाव्ये छन्दसां विचारः-**

दूतकाव्यपरम्परानुसारम् अन्येषां दूतकाव्यानामिव अत्रापि प्रमुखतया मन्दाक्रान्ताच्छन्दसः प्रयोगः दृश्यते।

**मन्दाक्रान्ताच्छन्दसः लक्षणम्-**

**मन्दाक्रान्ता-**

**लक्षणम् - मन्दाक्रान्ताऽम्बुधिरसनगैर्मोभनौतौगयुग्मम्।**[13]

**अर्थः-** यत्र मगणः,भगणः,नगणः,तगणः,तगणः तथा द्वौ गुरुवर्णौ सन्ति एवं च प्रतिपादं 4,10(4+6),17(4+6+7) तमे वर्णे यतिः भवति तत् मन्दाक्रान्ताच्छन्दः भवति।

**उदाहरणम्-1**

**रामोरामारमितचरितोऽप्यार्यमर्यादयास्तं**
**पाद्मैः पद्मे पविमिव वहन् मूर्ध्नि शापं स्वतापम्।**
**नीत्वा बाणानलशलभतां वालिनं वानरेशं**
**कृत्वा मैत्रीं सहरिजिदरिः श्रावणेऽध्यास्त शैलम्।।**[14]

**उदाहरणम्-2**

**सन्ध्याकाले मधुपवसतिं कञ्जमन्वेष्टुकामः**
**पश्येः काञ्चिद् गिरिवरगुहां पद्मिनी सद्मम्ञ्जुम्।**
**यस्यां रक्षः समरसमये सौम्य सौमित्रि साह्या**
**सीता गुप्तोपनिषदि यथा ब्रह्मविद्या सबोधा।।**[15]

**गणविचारः- SSS SII III SSI SSI S S** (म,भ,न,त,त,ग,ग)

सन्ध्याका- SSS लेमधु- SII पवस- III तिंकञ्ज- SSI

मन्वेष्टु- SSI का- S मः- S

**समन्वयः-** उपर्युक्तश्लोके गणविचारक्रमे क्रमशः मगणः, भगणः, नगणः, तगणः, तगणः तथा एकः गुरुवर्णः अस्ति एवं च प्रत्येकं पादेषु प्रति 4, 6(4+6=10) तथा 7 (4+6+7=17) तमे वर्णे यतिः भवति। अतः अत्र मन्दाक्रान्ता छन्दसः लक्षणम् समन्वितम् भवति।

**ख) सरयुलहरीखण्डकाव्यस्य सामान्यपरिचयः-**

सरयुलहरी एकं खण्डकाव्यं वर्तते। अत्र सर्वेषु श्लोकेषु शिखरिणीच्छन्दसः प्रयोगः दृश्यते। अत्र चतुःपञ्चाशत् संख्यकाः श्लोकाः विद्यन्ते। अत्र रामभक्तिपूर्वकं कविना अयोध्यायाः समीपवर्त्तिन्याः सरयू इत्याख्यायाः एकस्याः पवित्रनद्याः गुणगानपूर्वकवर्णनं कृतं वर्त्तते।

**शिखरिणी-**

**लक्षणम्- रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।**[16]

**अर्थः-** यस्मिन् छन्दसि प्रतिचरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, एकः लघुवर्णः तथा एकः गुरुवर्णश्चास्ति एवं च प्रतिपादं षष्ठात् एकादशात् च अक्षराद् यतिः भवति तत्र शिखरिणीछन्दः भवति।

**उदाहरणम्-1**

**अयोध्या सौभाग्यं विशदमथभाग्यं भगवतो**
**रघूणामानन्दं कमनकलकन्दं विधिभुवः।**
**दृगम्भोभूष्यन्दं मधुरमकरन्दं मधुमथः**
**सुधानिष्यन्दं ते सरयु सलिलङ्कंकलयतु।।**[17]

**गणविचारः- ISS SSS III IIS SII I S (**य, म, न, स, भ, ल, ग)

अयोध्या- ISS सौभाग्यं- SSS विशद- III मथभा- IIS

ग्यंभग- SII व-I तो-S

**समन्वयः** - अस्मिन् श्लोके गणविचारे क्रमानुसारं यगणः, मगणः, नगणः, सगणः, भगणः, एकोलघुवर्णः तथा एकः गुरूवर्णश्च विद्यन्ते एवं च प्रतिपादस्य षड्भिः तथा एकादशवर्णेषु यतिः भवति अतः अत्र शिखरिणी छन्दसः लक्षणं समन्वितं भवति।

**उदाहरणम्- 2**

**न चोत्सर्गस्वर्गो न जितरिपुवर्गं महि सुखं**
**न वा त्रैय्यावर्ग न पुनरपवर्ग निरवधि।**
**न वा रामा रम्या विबुधगणनम्या तव पुनः**
**पिबन् पाथोनाथस्तृणमिव कदाचिद् गणयति।।**[18]

**गणविचारः- ISS SSS III IIS SII I S** (य, म, न, स, भ, ल, ग)

नचोत्स- ISS र्गस्वर्ग- SSS न जित- III रिपुव- IIS

र्गमहि- SII सु - I खम्- S

**समन्वयः-** अस्मिन् श्लोके गणविचारे क्रमानुसारं यगणः, मगणः,नगणः,सगणः,भगणः,एको लघुवर्णः तथा एकः गुरूवर्णश्च विद्यन्ते एवं च प्रतिपादं षट्सु तथा एकादशवर्णेषु च यतिः भवति

अतः अत्र शिखरिणीच्छन्दसः लक्षणं समन्वितं भवति।

**ग) लघुरघुवरंखण्डकाव्यस्य सामान्यपरिचयः-**

लघुरघुवरम् इति महाकविश्रीरामभद्राचार्येण प्रणीतं खण्डकाव्यं वर्त्तते। सर्वप्रथमं लघुमात्रासु ग्रथितेऽस्मिन् काव्यकुसुमहारे खण्डकाव्यस्य सर्वाण्यपि लक्षणानि प्राप्यन्ते। काव्येऽस्मिन् चतुरशीतिसंख्याकाः श्लोकाः सन्ति। अत्र महाकविना स्वाराध्यस्य भगवतः राघवस्य शैशवस्य वर्णनं कृतमस्ति । पूर्वार्द्धे राघवं प्रति विनयं प्रदर्शितमुत्तरार्द्धे च भगवतः जन्मनः आरभ्य विविधबालक्रीडानां नैसर्गिकं वर्णनं दृश्यते। संपूर्णकाव्येऽस्मिन् अ,इ,उ चेति ह्रस्वमात्राणां व्यवहारः अभवत्। ह्रस्वमात्रासु विरचिदमिदं खण्डकाव्यं संस्कृतकाव्यजगति गौरवमयं पदमलङ्करोति। खण्डकाव्यमिदं चित्रकाव्यं वर्त्तते।

खण्डकाव्यमिदं हिन्दीभाषायां विद्यामानः चौपाई इति एकस्य छन्दसः प्रयोगेन विरचितम्। अस्मिन् छन्दसि प्रत्येकं चरणे षोडशसङ्ख्याकाः वर्णाः सन्ति। तदुदाहरणमाध्यमेनैव ज्ञातुं शक्यते।तद्यथा-

**उदाहरणम्-1**

**जयति जगति लघुरघुवर हरिरति**
**दिशति भजत इह सुखमधिकरि रति।**
**सुरसरिदिवयदनुचरित मलयति**
**निखिलभुवनमथ पतितममलयति ।।**[19]

**उदाहरणम्-2**

**जय दिनकरकुलवनरुहदिनकर**
**जय तनुरुचिजित शिखिगल जलधर।**
**जय हर हृदुंदज मधुकर मलहर**
**जय दशरथसुत शिशु लघु रघुवर ।।**[20]

एवं रूपेण स्वमिरामभद्राचार्यविरचितेषु खण्डकाव्येषु छन्दसां प्रयोगः दृश्यते। वास्तविकतया कविरयं छन्दश्शास्त्रोक्तदृष्ट्या बहूनां छन्दसामनुकरणं कृत्वा एव स्वकाव्यकवितादिकं रचयति। अस्य काव्यकवितादिकपठनेन जनमानसां चित्तमाह्लाद्यते तथा तेषां मनसि भगवद्भक्तिरुत्पद्यते इति नास्त्यत्र संशयस्यावकाशः।

**उपसंहारः-**

**'अपि माषं मषं कुर्यात् छन्दोभङ्गं न कारयेत्'** इति प्रसिद्धवचनानुसारं छन्दसः अप्रतिमं महात्म्यं वर्त्तते।नाट्यशास्त्र-कारेणाचार्येण भरतमुनिना कथितं यत्-

**'न छन्दोहीनोऽस्ति शब्दः न शब्दः छन्दवर्जितम्'**[21] इति मतानुसारं संसारेऽस्मिन् प्रत्येकं शब्दः छन्दोयुक्तः वर्त्तते। छन्दोविहीनः कोऽपि शब्दः न विद्यते इति कारणादेव संस्कृतसाहित्ये छन्दसः प्रामुख्यतोपयोगिता च सर्वैरङ्गीक्रियते।

जगद्गुरुरामभद्राचार्याणां रामभक्त्याधारितखण्डकाव्येषु छन्दसां प्रयोगः पाठकजनानां मनसि रारम्यते इति नास्त्यत्र संशीतिलेशोऽपि।

**सङ्केताक्षरसूची-**

क)पा.शि.-पाणिनीयशिक्षा
ख)यजु.-यजुर्वेदः
ग)छ.म.-छन्दोमञ्जरी
घ)वा.रा.वा.-वाल्मीकिरामायणम् बालकाण्डः
ङ)श्रुत.-श्रुतबोधः
च)भृङ्ग-भृङ्गदूतम्
छ)सरयू.-सरयुलहरी
ज)लघु.-लघुरघुवरम्
झ)ना.शा.-नाट्यशास्त्रम्

**सन्दर्भग्रन्थसूची-**

क) पाणिनीयशिक्षा - डाँ.राकेश शास्त्री, चौखम्बा ओरियण्टालिया, दिल्ली, 110007
ख) यजुर्वेदसंहिता - कह्नैयालाल जोशी- परिमल पब्लिकेशन्स्, देहली, द्वितीय संस्करण, 2019
ग) छन्दोमञ्जरी - डा.सुशान्त कुमार राजः, साम्विदी प्रकाशन, पुरी, ओडिशा
घ) वाल्मीकिरामायणम् - गीताप्रेस्, गोरखपुरः, उत्तरप्रदेशः
ङ) श्रुतबोधः- श्रीसीताराम झा, चौखम्वा संस्कृत सीरीज आफिस, वाराणसी, 2012
च) भृङ्गदूतम्- स्वामी रामभद्राचार्यः (मूल रचयिता), जगद्गुरुराम-भद्राचार्यविकलाङ्गविश्वविद्यालयः, चित्रकूटः, 2005
छ) सरयुलहरी - स्वामी रामभद्राचार्यः (मूल रचयिता), जगद्गुरु-रामभद्राचार्यविकलाङ्गविश्वविद्यालयः, चित्रकूटः, 2001
ज) लघुरघुवरम्- स्वामी रामभद्राचार्यः, जगद्गुरुरामभद्राचार्य-विकलाङ्गविश्वविद्यालयः, चित्रकूटः, 2001
झ) नाट्यशास्त्रम् - बाबुलाल शुक्ला शास्त्री, चौखम्बा संस्कृत संस्थानम्, वारणासी 2003

**सन्दर्भ :-**

[1]पा.शि.-41
[2]पा.शि.-42
[3]पा.शि.-52
[4]यजुः-23/33
[5]वा.रा.वा-2/15
[6]छ.म.-1/4
[7]छ.म.-1/5,6
[8]छ.म.-1/8
[9]श्रुत-पृ-11
[10] छ.म.-1/11
[11] श्रुत-पृ-12
[12] छ.म.-1/9
[13] छ.म.पृ-189
[14] भृ.दू.(पूर्व)-1
[15] भृ.दू.(उत्तर)-1
[16] छ.म.पृ-184
[17] सरयु.-1
[18] सरयु-31
[19] लघु-1
[20] लघु-7
[21] ना.शा.(षष्ठोऽध्यायः)-